# दारिद्र्यदहन शिवस्तोत्रं

विश्वेश्वराय नरकार्णव तारणाय
कर्णामृताय शशिशेखर धारणाय ।
कर्पूरकान्ति धवलाय जटाधराय
दारिद्र्यदुःख दहनाय नमश्शिवाय ॥ 1

गौरिप्रियाय रजनीश कलाधराय
कालान्तकाय भुजगाधिप कंकणाय ।
गंगाधराय गजराज विमर्धनाय
दारिद्र्यदुःख दहनाय नमश्शिवाय ॥ 2

भक्तिप्रियाय भवरोग भयापहाय
उग्राय दुःख भवसागर तारणाय ।
ज्योतिर्मयाय गुणनाम सुनृत्यकाय
दारिद्र्यदुःख दहनाय नमश्शिवाय ॥ 3

चर्मांबराय शवभस्म विलेपनाय
फालेक्षणाय मणिकुंडल मंडिताय ।
मंजीरपादयुगलाय जटाधराय
दारिद्र्यदुःख दहनाय नमश्शिवाय ॥ 4

© 2022 Vedam Nadam

पंचाननाय फणिराज विभूषणाय
हेमांकुशाय भुवन त्रयमंडिताय ।
आनंद भूमि वरदाय तमोमयाय
दारिद्र्यदुःख दहनाय नमश्शिवाय ॥ 5

भानुप्रियाय भवसागर तारणाय
कालान्तकाय कमलासन पूजिताय ।
नेत्रत्रयाय शुभलक्षण लक्षिताय
दारिद्र्यदुःख दहनाय नमश्शिवाय ॥ 6

रामप्रियाय रघुनाथ वरप्रदाय
नागप्रियाय नरकार्णव तारणाय ।
पुण्याय पुण्यभरिताय सुरार्चिताय
दारिद्र्यदुःख दहनाय नमश्शिवाय ॥ 7

मुक्तीश्वराय फलदाय गणेश्वराय
गीतप्रियाय वृषभेश्वर वाहनाय ।
मातंगचर्म वसनाय महेश्वराय
दारिद्र्यदुःख दहनाय नमश्शिवाय ॥ 8

© 2022 Vedam Nadam

वसिष्ठेन कृतं स्तोत्रं सर्वरोग निवारणम् ।
सर्व संपत्करं शीघ्रं पुत्रपौत्रादि वर्धनम् ।
त्रिसंध्यं यः पठेन्नित्यं स हि स्वर्ग मवाप्नुयात् ॥

॥ इति श्री वसिष्ठ विरचितं दारिद्र्यदहन शिवस्तोत्रम् संपूर्णम् ॥

© 2022 Vedam Nadam